# શ્રીકૃષ્ણસ્તુતિઃદેવ

Shri Krishnastutihdeva

sanskritdocuments.org

May 13, 2018

# Shri Krishnastutihdeva

# શ્રીકૃષ્ણસ્તુતિઃદેવ

## Sanskrit Document Information

Text title : kRRiShNastutiHdeva

File name : kRRiShNastutiHdeva.itx

Category : vishhnu, krishna

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : May 13, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 13, 2018

*sanskritdocuments.org*

# Shri Krishnastutihdeva

# શ્રીકૃષ્ણસ્તુતિઃદેવ

દેવકૃતા

નતાઃ સ્મ તે નાથ પદારવિન્દં બુદ્ધીન્દ્રિયપ્રાણમનોવચોભિઃ ।
યચ્ચિન્ત્યતેઽન્તર્હૃદિ ભાવયુક્તૈર્મુમુક્ષુભિઃ કર્મમયોરુપાશાત્ ॥ ૧॥

ત્વં માયયા ત્રિગુણયાઽઽત્મનિ દુર્વિભાવ્યં
વ્યક્તં સૃજસ્યવસિ લુમ્પસિ તદ્ગુણસ્થઃ ।
નૈતૈર્ભવાનજિત કર્મભિરજ્યતે વૈ
યત્સ્વે સુખેઽવ્યવહિતેઽભિરતોઽનવદ્યઃ ॥ ૨॥

શુદ્ધિર્નૃણાં ન તુ તથેડ્ય દુરાશયાનાં
વિદ્યાશ્રુતાધ્યયનદાનતપઃક્રિયાભિઃ ।
સત્ત્વાત્મનામૃષભ તે યશસિ પ્રવૃદ્ધ-
સચ્છ્રદ્ધયા શ્રવણસમ્ભૃતયા યથા સ્યાત્ ॥ ૩॥

સ્યાન્નસ્તવાઙ્ઘ્રિરશુભાશયધૂમકેતુઃ
ક્ષેમાય યો મુનિભિરાર્દ્રહૃદોહ્યમાનઃ ।
યઃ સાત્ત્વતૈઃ સમવિભૂતય આત્મવદ્ભિઃ
વ્યૂહેઽર્ચિતઃ સવનશઃ સ્વરતિક્રમાય ॥ ૪॥

યશ્ચિન્ત્યતે પ્રયતપાણિભિરધ્વરાગ્નૌ
ત્રય્યા નિરુક્તવિધિનેશ હવિર્ગૃહીત્વા ।
અધ્યાત્મયોગ ઉત યોગિભિરાત્મમાયાં
જિજ્ઞાસુભિઃ પરમભાગવતૈઃ પરીષ્ટઃ ॥ ૫॥

પર્યુષ્ટયા તવ વિભો વનમાલયેયં
સંસ્પર્ધિની ભગવતી પ્રતિપત્નિવચ્છ્રીઃ ।
યઃ સુપ્રણીતમમુયાર્હણમાદદન્નો
ભૂયાત્સદાઙ્ઘ્રિરશુભાશયધૂમકેતુઃ ॥ ૬॥

કેતુસ્ત્રિવિક્રમયુતસ્ત્રિપતત્પતાકો
યસ્તે ભયાભયકરોઽસુરદેવચમ્વોઃ ।
સ્વર્ગાય સાધુષુ ખલેષ્વિતરાય ભૂમન્
પાદઃ પુનાતુ ભગવન્ ભજતામઘં નઃ ॥ ૭॥

નસ્યોતગાવ ઇવ યસ્ય વશે ભવન્તિ
બ્રહ્માદયસ્તનુભૃતો મિથુરર્દ્યમાનાઃ ।
કાલસ્ય તે પ્રકૃતિપૂરુષયોઃ પરસ્ય
શં નસ્તનોતુ ચરણઃ પુરુષોત્તમસ્ય ॥ ૮॥

અસ્યાસિ હેતુરુદયસ્થિતિસંયમાનાં
અવ્યક્તજીવમહતામપિ કાલમાહુઃ ।
સોઽયં ત્રિણાભિરખિલાપચયે પ્રવૃત્તઃ
કાલો ગભીરરય ઉત્તમપૂરુષસ્ત્વમ્ ॥ ૯॥

ત્વત્તઃ પુમાન્ સમધિગમ્ય યયા સ્વવીર્યં
ધત્તે મહાન્તમિવ ગર્ભમમોઘવીર્યઃ ।
સોઽયં તયાનુગત આત્મન આણ્ડકોશં
હૈમં સસર્જ બહિરાવરણૈરુપેતમ્ ॥ ૧૦॥

તત્તસ્થુષશ્ચ જગતશ્ચ ભવાનધીશો
યન્માયયોત્થગુણવિક્રિયયોપનીતાન્ ।
અર્થાઞ્જુષન્નપિ હૃષીકપતે ન લિપ્તો
યેઽન્યે સ્વતઃ પરિહૃતાદપિ બિભ્યતિ સ્મ ॥ ૧૧॥

સ્માયાવલોકલવદર્શિતભાવહારિ
ભ્રૂમણ્ડલપ્રહિતસૌરતમન્ત્રશૌણ્ડૈઃ ।
પત્ન્યસ્તુ ષોડશસહસ્રમનઙ્ગબાણૈઃ
યસ્યેન્દ્રિયં વિમથિતું કરણૈર્ન વિભ્વ્યઃ ॥ ૧૨॥

વિભ્વ્યસ્તવામૃતકથોદવહાસ્ત્રિલોક્યાઃ
પાદાવનેજસરિતઃ શમલાનિ હન્તુમ્ ।
આનુશ્રવં શ્રુતિભિરઙ્ઘ્રિજમઙ્ગસઙ્ગૈઃ
તીર્થદ્વયં શુચિષદસ્ત ઉપસ્પૃશન્તિ ॥ ૧૩॥

ઇતિ દેવકૃતા શ્રીકૃષ્ણસ્તુતિઃ સમાપ્તા ।

Peculiarity of this stotra is, from verse 3 onwards,
subsequent shlokas start with the ending word of the previous
shlokas.

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Krishnastutihdeva*

pdf was typeset on May 13, 2018

Please send corrections to *sanskrit@cheerful.com*